# Janaki Sahasra Namavali

# जानकी सहस्रनामावलिः

## Document Information

Text title : Janaki Sahasranamavali

File name : jAnakIsahasranAmAvaliH.itx

Category : devii, devI, sItA, sahasranAmAvalI, nAmAvalI

Location : doc_devii

Proofread by : Raman. M, PSA Easwaran

Description/comments : From shrIjAnakIcharitAmrite saptAshItitamo.adhyAyaH 87, See corresponding stotram and Hindi meaning

Latest update : December 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

# जानकी सहस्रनामावलिः

श्रीजानकीचरितामृते सप्ताशीतितमोऽध्यायोधृता श्रीजानकीसहस्रनामावलिः ॥ ८७॥

अथ श्रीयोगेश्वरकवि द्वारा वर्णिता श्रीजानकीसहस्रनामावलिः ।
ॐ अकल्पायै नमः । अकल्मषायै । अकामायै । अकायायै ।
अकारचर्चितायै । अकारणायै । अकोपपूज्यायै । अक्रूरैकायै । अक्षणायै ।
अक्षरायै । अगदायै । अगुणायै । अग्रगण्यायै । अचलापुत्रिकायै ।
अचलायै । अच्युतायै । अजायै । अजेयबुद्ध्यै । अज्ञातगतिसत्तमायै ।
अणोरणीयस्यै नमः । २०

ॐ अतर्क्यायै नमः । अतीन्द्रियचयायै । अतुलायै । अदभ्रमहिमायै ।
अदृश्यायै । अद्वितीयक्षमानिधये । अद्वितीयदयामूर्त्यै ।
अद्वितीयानहङ्कृत्यै । अदीनबुद्ध्यै । अद्वैतायै । अधृतायै ।
अधोक्षजायै । अनघायै । अनन्तविग्रहायै । अनन्तायै ।
अनन्तैश्वर्यसंयुतायै । अनन्यभावसन्तुष्टायै । अनर्थौघनिवारिण्यै ।
अनवद्यायै । अनामरूपायै नमः । ४०

ॐ अनिर्देश्यस्वरूपिण्यै नमः । अनिर्वाच्यसुखाम्भोध्यै ।
अनिर्वाच्याङ्घ्रिमार्दवायै । अनिर्विण्णायै । अनुकूलैकायै ।
अनुकम्पैकपूर्णविग्रहायै । अनुत्तमायै । अनुत्तमात्मने ।
अनुरागभराञ्चितायै । अपारमहिम्ने । अपारभववारिधितारिण्यै ।
अपूर्वचरितायै । अपूर्वसिद्धान्तायै । अपूर्वसौभगायै ।
अप्रकृष्टायै । अप्रतिद्वन्द्वविक्रमायै । अप्रतिमद्युत्यै ।
अप्रतिमायै । अप्रमत्तात्मने । अप्रमेयसुखाकृत्यै ।
अप्राकृतगुणैश्वर्यविश्वमोहनविग्रहायै नमः । ६०

ॐ अभिवाद्यायै नमः । अमलायै । अमानायै । अमितायै । अमृतरूपिण्यै ।
अमृतायै । अमृतदृष्ट्यै । अमृताशायै । अमृतोद्भवायै ।

अयोनिसम्भवायै । अरौद्रायै । अलोलायै । अवनिपुत्रिकायै । अवरायै ।
अवर्ण्यमाधुर्य्यायै । अवर्ण्यकरुणावध्यै । अविचिन्त्यायै ।
अविशिष्टात्मने । अव्यक्तायै । अव्ययशेमुष्यै नमः । ८०

ॐ अव्याजकरुणामूर्त्यै नमः । अशोकायै । असङ्ख्यकायै । असमायै ।
असम्मितायै । आप्तसङ्कल्पायै । आत्मज्ञानविभाकर्यै । आत्मोद्भवायै ।
आत्ममर्मज्ञायै । आत्मलाभप्रदायिन्यै । आत्मवत्यै । आदिकर्त्र्यै । आद्ये ।
आधापरमालयायै । आध्येयाङ्घ्रिसरोजाङ्कायै । आनन्दामृतवर्षिण्यै ।
आम्नायवेद्यचरणायै । आश्रितत्राणतत्परायै । आसक्त्यपहृतासक्त्यै ।
आस्यस्पर्द्धिविधुव्रजायै नमः । १००

ॐ आह्लादसूपमासिन्धवे नमः । इनवंश्यपरप्रियायै ।
इन्दुपूर्णोल्लसद्वक्त्रायै । इभराजसुतागत्यै । इयत्त्वरहितायै ।
प्रपन्नसकलापदां ईर्वाल्व्यै । समस्तदेवानां इष्टायै ।
ईप्सितार्थप्रदायिन्यै । सर्वलोकानां ईश्वर्यै ।
उच्छिन्नाश्रितसंशयायै । उज्ज्वलैकसमाराध्यायै ।
उत्फुल्लेन्दीवरेक्षणायै । उत्तरायै । उत्तानहस्ताब्जायै । उत्तमायै ।
उत्सङ्गभूषणायै । उदारकीर्तनायै । उदारचरितायै । उदारवन्दनायै ।
उदारजपपाठेज्यायै नमः । १२०

ॐ उदारध्यानसंस्तयायै नमः । उदारवल्लभायै ।
उदारवीक्षणस्मितभाषितायै । उदारश्रीनामरूपलीलाधामगुणव्रजायै ।
उदारालिगणायै । उदारोपासकायै । ऋतरूपिण्यै । ऋभुवन्द्याङ्घ्र्यै ।
ॠकारायै । ऌपुत्र्यै । ॡस्वरूपिण्यै । एकायै । एकशरणं पुंसायै ।
ऐक्यभावप्रसादितायै । ओकःप्रधानिकायै । ओजोऽब्ध्यै । विश्रुत
औदार्यौत्कर्ष्यै । कमलायै । कमलाराध्यायै । करणायै नमः । १४०

ॐ कलभाषिण्यै नमः । कलाधारायै । कलाभिज्ञायै । कलामूर्त्यै ।
कलावध्यै । कल्पवृक्षाश्रयायै । कल्प्यायै । कल्मषौघनिवारिण्यै ।
कल्याणदात्र्यै । कल्याणप्रकृत्यै । कामचारिण्यै । कामदायै ।
काम्यसंसक्त्यै । कारणाद्वयकारण्यै । कारुण्यार्द्रविशालाक्ष्यै ।
कालचक्रप्रवर्तिकायै । कीनाशभयमूलघ्न्यै । कुञ्जकेलिसुखप्रदायै ।
कुञ्जराधीशगतिकायै । कृतज्ञार्च्यायै नमः । १६०

ॐ कृतागमायै नमः । कृपापीयूषजलाध्यै । कोमलार्च्यपदाम्बुजायै ।

कौशल्याप्रतिमाम्भोध्यै । कौशल्यासुतवल्लभायै ।
खरारिहृदयातुल्यपरमोत्सवरूपिण्यै । खलान्यमतिसन्दात्र्यै ।
खवासीशादिवन्दितायै । खेलमात्रजगत्सृष्ट्यै । गणनाथार्च्चितायै ।
गत्यै । गतैश्वर्यस्मयश्रेष्ठायै । गभीरायै । गम्यभावनायै ।
गहनाग्र्यायै । गिरे । गीर्वाणहितसाधनतत्परायै । गुप्तायै ।
गुहेशयायै । गुह्यायै नमः । १८०

ॐ गेयोदारयशस्तत्यै नमः । गोपनीयपदासक्त्यै । गोप्त्र्यै ।
गोविदनुत्तमायै । ग्रहणीयशुभादर्शायै । ग्लौपुञ्जाभनखच्छव्यै ।
घनश्यामात्मनिलयायै । घर्मद्युतिकुलस्नुषायै । घृणालुकायै ।
ङस्वरूपायै । चतुरात्मने । चतुर्गत्यै । चतुर्भावायै ।
चतुर्व्यूहायै । चतुर्वर्गप्रदायिन्यै । चतुर्वेदविदां
श्रेष्ठायै । चपलासत्कृतद्युत्यै । चन्द्रकलासमाराध्यायै ।
चन्द्रबिम्बोपमाननायै । चारुशीलादिभिः सेव्यायै नमः । २००

ॐ चारुसम्पावनास्मितायै नमः । चारुरूपगुणोपेतायै ।
चारुस्मरणमङ्गलायै । चार्वङ्ग्यै । चिदलङ्कारायै ।
चिदानन्दस्वरूपिण्यै । छविक्षुब्धरत्यै ।
छिन्नप्रणताशेषसंशयायै । जगत्क्षेमविधानज्ञायै ।
जगत्सेतुनिबन्धिन्यै । जगदाद्यै । जगदात्मप्रेयस्यै ।
जगदात्मिकायै । जगदालयवृन्देश्यै । जगदालयसङ्घसुवे ।
जगदुद्भवादिकर्त्र्यै । जगदेकपरायणायै । जगन्नेत्र्यै । जगन्मात्रे ।
जगन्माङ्गल्यमङ्गलायै नमः । २२०

ॐ जगन्मोहनमाधुर्यमनोमोहनविग्रहायै नमः । जतुशोभिपदाम्भोजायै ।
जनकानन्दवर्धिन्यै । जनकल्याणसक्तात्मने । सर्वदेहिनां
जनन्यै । जननीहृदयानन्दायै । जनबाधानिवारिण्यै ।
जनसन्तापशमन्यै । सुखसम्पदां जनित्र्यै । जनेश्वरेड्यायै ।
जन्मान्तत्रासनिर्णाशचिन्तनायै । जपनीयायै । जयघोषाराध्यमानायै ।
जयप्रदायै । जयायै । जयावहायै । जन्मजरामृत्युभयातिगायै ।
जलकेलिमहाप्राज्ञायै । जलजासनवन्दितायै । जलजारुणहस्ताङ्घ्र्यै नमः । २४०

ॐ जलजायतलोचनायै नमः । जवानतमनोवेगायै ।
जाड्यध्वान्तनिवारिण्यै । जानक्यै । जितमायैकायै । जितामित्रायै ।

जितच्छव्यै । जितद्वन्द्वायै । जितामर्षायै । जीवमुक्तिप्रदायिन्यै ।
जीवानां परमाराध्यायै । जीवेश्यै । जेतृसद्गत्यै । जेत्र्यै ।
ज्ञानदायै । ज्ञानपाथोध्यै । ज्ञानिनां गत्यै । आत्महितकामानां
ज्ञेयायै । ज्येष्ठायै । ज्योत्स्नाधिपाननायै नमः । २६०

ॐ ज्वरातिगायै नमः । ज्वलत्कान्त्यै । ज्वालामालासमाकुलायै ।
झणन्नूपुरपादाब्जायै । झम्पाकेशप्रसादितायै ।
झपकेतुप्रियायूथसञ्चितच्छविमोहिन्यै ।
झाटवाटोत्सवाधारायै । अरूपायै । टुण्टुकेतरायै । ठात्मिकायै ।
डम्बरोत्कृष्टायै । दामराधीशगामिन्यै । ढुण्ढीष्टदेवतायै ।
ढक्कामञ्जुनादप्रहर्षितायै । णकारायै । तडिदोघाभदीप्ताङ्ग्यै ।
तत्त्वरूपिण्यै । तत्त्वकुशलायै । तत्त्वात्मने । तत्त्वादये नमः । २८०

ॐ तनुमध्यमायै नमः । तन्तुप्रवर्द्धिन्यै । तन्व्यै ।
तपनीयनिभद्युत्यै । तपोमूर्त्यै । तपोवासायै । तमसः परतः
परायै । तमोघ्न्यै । तापशमन्यै । तारिण्यै । तुष्टमानसायै ।
तुष्टिप्रदायिकायै । तृप्तायै । तृप्त्यै । तृप्त्येककारिण्यै ।
तेजःस्वरूपिण्यै । तेजोवृषायै । तोयभवार्चितायै । त्रिकालज्ञायै ।
त्रिलोकेश्यै नमः । ३००

ॐ थै थै शब्दप्रमोदिन्यै नमः । दक्षायै । दनुजदर्पघ्न्यै ।
दमिताश्रितकण्टकायै । दम्भादिमलमूलघ्न्यै । दयार्द्राक्ष्यै ।
दयामय्यै । दशास्यन्दनजप्रेष्ठायै । दाक्षिण्याखिलपूजितायै ।
दान्तायै । दारिद्र्यशमन्यै । दिव्यध्येयशुभाकृत्यै । दिव्यात्मने ।
दिव्यचरितायै । दिव्योदारगुणान्वितायै । दिव्यायै । दिव्यात्मविभवायै ।
दीनोद्धरणतत्परायै । दीप्ताङ्ग्यै । दीप्तमहिमायै नमः । ३२०

ॐ दीप्यमानमुखाम्बुजायै नमः । दुरासदायै ।
दुराराध्यायै । दुरितघ्न्यै । दुर्मर्षणायै । दुर्ज्ञेयायै ।
दुष्प्रकृतिघ्न्यै । दुःस्वप्नादिप्रणाशिन्यै । द्युत्यै ।
द्युतिमत्यै । देवचूडामणिप्रभुप्रियायै । देवताहितदायै ।
दैन्यभावाचिरसुतोषितायै । धराकन्यायै । धरानन्दायै ।
धरामोदविवर्धिन्यै । धरारत्न्यै । धर्मनिधये ।
धर्म-सेतुनिबन्धिन्यै । धर्मशास्त्रानुगायै नमः । ३४०

ॐ धामपरिभूततडिद्द्युत्यै नमः । धृत्यै । ध्रुवायै ।
नतिप्रीतायै । नयशास्त्रविशारदायै । नामनिर्धूतनिरयायै ।
निगमान्तप्रतिष्ठितायै । निगमैर्गीतचरितायै । नित्यमुक्तनिषेवितायै ।
निधये । निमिकुलोत्तंसायै । निमित्तज्ञानिसत्तमायै ।
नियतेन्द्रियसम्भाव्यायै । नियतात्मने । निरञ्जनायै । निराकारायै ।
निरातङ्कायै । निराधारायै । निरामयायै । निर्व्याजकरुणामूर्त्यै नमः । ३६०

ॐ नीत्यै नमः । पङ्केरुहेक्षणायै । पतितोद्धारिण्यै ।
पद्मगन्धेष्टायै । पद्मजार्चितायै । पद्मपादायै । पद्मवक्त्रायै ।
पद्मिन्यै । परमेश्वर्यै । परब्रह्मणे । परस्पष्टायै । पराशक्त्यै ।
परिग्रहायै । परित्रात्र्यै । परिश्लाघ्यायै । परेष्टायै ।
पर्यवस्थितायै । पवित्रायै । पाटवाधारायै । पातिव्रत्यधुरन्धर्यै नमः । ३८०

ॐ पापिपापौघसंहर्त्र्यै नमः । पारिजातसुमार्चितायै ।
पावनानुत्तमादर्शायै । पावन्यै । पुण्यदर्शनायै ।
पुण्यश्रवणचरितायै । पुण्यश्लोकवरीयस्यै ।
पुष्पालङ्कारसम्पन्नायै । पुष्ट्यै । पुष्टिदायिन्यै । पूतात्मने ।
पूतसर्वेहायै । पूज्यपादाम्बुजद्वयायै । पूर्णायै । पूर्णेन्दुवदनायै ।
प्रकृत्यै । प्रकृतेः परायै । प्रकृष्टात्मने । प्रणम्याङ्घ्र्यै ।
प्रणयातिशयप्रियायै नमः । ४००

ॐ प्रणतातुल्यवात्सल्यायै नमः । प्रणतध्वस्तसंसृत्यै ।
प्रणविन्यै । प्रतिष्ठात्र्यै । प्रथमायै । प्रथितायै । प्रध्यै ।
प्रपन्नरक्षणोद्योगायै । प्रवित्तायै । प्रविशारदायै । प्रह्व्यै ।
प्राणप्रदायै । प्राणनिलयायै । प्राणवल्लभायै । प्राणात्मिकायै ।
प्रार्थनीयायै । प्रियमोहनदर्शनायै । प्रियार्हायै । प्रीतितत्त्वज्ञायै ।
प्रीतिदायै नमः । ४२०

ॐ प्रीतिवर्धिन्यै नमः । प्रेज्यायै । प्रेमरतायै ।
प्रेमवल्लभातीववल्लभायै । प्रेमवारां निधये । प्रेमविग्रहायै ।
प्रेमवैभवायै । प्रेमशक्त्येकविवशायै । प्रेमसंसाध्यदर्शनायै ।
प्रेमैकहाटकागारायै । प्रेमैकाद्भुतविग्रहायै ।
फणीन्द्रावर्ण्यविभवायै । सुकर्मणां फलरूपायै । बुद्धिदायै ।
बुधमृग्याङ्घ्रिकमलायै । बोधवारिध्यै । ब्रह्मलेखातिगायै ।

ब्रह्मवेत्त्र्यै । ब्रह्माण्डवृन्दसुवे । भक्तत्राणविधानज्ञायै नमः । ४४०

ॐ भक्तिसंसाध्यदर्शनायै नमः । भजनीयगुणोपेतायै । भयघ्न्यै ।
भयतारिण्यै । भवपूज्यायै । भवाराध्यायै । भवोत्पत्यादिकारिण्यै ।
भाग्यैकसंशोधयित्र्यै । भावैकपरितोषितायै । भूतप्रसूत्यै ।
भूतात्मने । भूताद्यै । भूतदायिन्यै । भूतिमत्समुपास्याङ्घ्र्यै ।
भूसुतायै । भ्रान्तिहारिण्यै । मङ्गलाशेषमाङ्गल्यायै ।
मङ्गलैकमहानिधये । मधुरायै । मधुराकारायै नमः । ४६०

ॐ मननीयगुणावल्यै नमः । मनोजवायै । मनोज्ञाङ्ग्यै ।
मनोरमगुणान्वितायै । मनःस्वरूपायै । महत्यै । महनीयगुणाम्बुधये ।
महद्ध्येकायै । महाकीर्त्यै । महाकोशायै । महाक्रतवे । महाक्रमायै ।
महागर्तायै । महाछव्यै । महाद्युत्यै । महादृष्ट्यै । महाधाम्न्यै ।
महानन्दस्वरूपिण्यै । महानायकसम्मात्यायै । महानैपुण्यवारिधये नमः । ४८०

ॐ महापूज्यायै नमः । महाप्राज्ञायै । महाप्रेज्यायै ।
महाफलायै । महाभागायै । महाभोगायै । महामतिमतां वरायै ।
महामाधुर्यसम्पन्नायै । महामायास्वरूपिण्यै । महायोगप्रसाध्यैकायै ।
महायोगेश्वरप्रियायै । महारत्यै । महालक्ष्म्यै । महाविद्यास्वरूपिण्यै ।
महाशक्त्यै । महाश्रेष्ठायै । महाश्लाघ्ययशोऽन्वितायै ।
महासिद्ध्यै । महासेव्यायै । महासौभाग्यदायिन्यै नमः । ५००

ॐ महाहव्यै नमः । महार्हार्हायै । महिष्ठात्मने । महीयस्यै ।
महीशजायै । महोत्कर्षायै । महोत्साहायै । महोदयायै । महोदारायै ।
महेशादिसमालभ्व्याङ्घ्रिपङ्कजायै । समस्तजगतां मात्रे ।
माधुरीजितमाधुर्यै । मान्यपरमसम्मान्यायै । मायै । मितकोकिलस्वनायै ।
मिथिलेशक्रतूद्भूतायै । मिथिलेश्वरनन्दिन्यै । मीनाक्ष्यै ।
मुक्तिवरदायै । मुनिसेव्यपदाम्बुजायै नमः । ५२०

ॐ मुनीन्द्रावर्ण्यमहिमायै नमः । मूलप्रकृतिसञ्ज्ञितायै ।
मृगनेत्रायै । मृगाङ्काभवदनायै । मृदुभाषिण्यै । मृदुलायै ।
मृदुलाचारायै । मृदुसमोहनेक्षणायै । मृदुस्वभावसम्पन्नायै ।
मृद्यै । मेधसमुद्भवायै । मेधेश्यै । मैथिल्यै । मोदवर्षिण्यै ।
मौढ्यभञ्जिकायै । यतचित्तेन्द्रियग्रामायै । युक्तायै ।
युक्तात्मभाषितायै । योगदायै । योगनिलयायै नमः । ५४०

ॐ योगस्थायै नमः । योगिनां गत्यै । योगिनां समुपालभ्यायै ।
योगिराजप्रियात्मजायै । रक्तोत्पललसद्धस्तायै ।
रघुनन्दनवल्लभायै । रघुनाथस्वभावज्ञायै । रघुवीरसुखे
रतायै । रतिसौन्दर्यदर्पघ्न्यै । रतीशेहाहरस्मृत्यै ।
रविमण्डलध्यस्थायै । रविवंशेन्दुहृत्स्थितायै । रसज्ञायै ।
रसभावज्ञायै । रसानन्दविवर्धिन्यै । रमणीयगुणग्रामायै ।
रमाराध्यायै । रमालयायै । रम्यरम्यनिधये । रम्याशेषायै नमः । ५६०

ॐ रसमयाकृत्यै नमः । रसापुत्र्यै । रसासक्तायै । रसिकानां
परागत्यै । रसिकेन्द्रप्रियायै । राकाधिपपुञ्जनिभाननायै ।
राघवेन्द्रप्रभावज्ञायै । राधायै । रासरसेश्वर्यै ।
रासलीलाकलापज्ञायै । रासानन्दप्रदायिन्यै । रासेश्यै ।
रूपदाक्षिण्यमण्डितायै । लक्ष्मणार्च्चितायै । ललनादर्शचरितायै ।
ललनाधर्मदीपिकायै । ललामैकनामरूपलीलाधामगुणादिकायै ।
ललिताम्भोजपत्राक्ष्यै । ललिताशेषचेष्टितायै । लावण्यजितपाथोधये नमः । ५८०

ॐ लाकृत्यै नमः । लीनरक्षिकायै । लीलाभूमाधवप्रेष्ठायै ।
लोककल्याणतत्परायै । लोकत्रयमहाराज्ञ्यै ।
लोकमृग्याङ्घ्रिपङ्कजायै । लोकज्ञायै । लोकशरणायै ।
लोकपावनपावन्यै । लोकप्रगीतमहिमायै । लोकानुत्तमदर्शनायै ।
लोकालयकलापाम्बायै । लोकोत्पत्यादिकारिण्यै । लोकेशकान्तायै । लोकेश्यै ।
लोकैकप्रियकाङ्क्षिण्यै । लोचनादीन्द्रियव्रातशक्तिसञ्चारकारिण्यै ।
लोपयित्र्यै । लोभहरायै । लोमशादिकभावितायै नमः । ६००

ॐ वत्सरायै नमः । वत्सलोत्कृष्टायै । वदान्यायै । वनजेक्षणायै ।
वनमालाञ्चितायै । वभ्व्यै । वरणीयपदाश्रयायै ।
वरदाधिराजकान्तायै । वरदायै । वरवर्णिन्यै । वरबोधायै ।
वरारोहाभूषितायै । वर्णनातिगायै । वर्णाभावायै । वर्णश्रेष्ठायै ।
वर्णाश्रमविधायिन्यै । वर्ण्यानवद्यचित्केल्यै । सुखसम्पदां
वर्धिन्यै । वशकृते । वशगश्रेष्ठायै नमः । ६२०

ॐ वश्यायै नमः । वसुप्रदायिन्यै । बहुश्रुतायै । वाच्यकीर्त्यै ।
वारिजासनवन्दितायै । विकल्मषायै । विक्षरात्मने । विगतेहायै ।
विजेतृकायै । विज्ञानदात्र्यै । विज्ञानमयाप्राकृतविग्रहायै ।

विज्ञायै । विज्वरायै । विदितायै । विदिशायै । विद्ययाऽन्वितायै ।
विद्यावत्पुङ्गवोत्कृष्टायै । विधात्र्यै । विधिकेतनायै ।
विधिदुर्ज्ञेयमहिमायै नमः । ६४०

ॐ विधुपूर्णमुखाम्बुजायै नमः । विनयार्हायै । विनीतात्मने ।
विपक्वात्मने । विपद्धरायै । विमत्सरायै । विमलार्च्यायै ।
विमुक्तात्मने । विमुक्तिदायै । विमोहिन्यै । वियन्मूर्त्यै ।
विरतिप्रदचिन्तनायै । विरामायै । विलसत्क्षान्त्यै ।
विबुधर्षिगणार्चितायै । विवेकपरमाधारायै । विवेकवदुपासितायै ।
विशदश्लोकसम्पूज्यायै । विशालेन्दीवरेक्षणायै । विशिष्टात्मने नमः । ६६०

ॐ विशेषज्ञायै नमः । विश्वलीलाप्रसारिण्यै । विश्वतः
पाणिपादास्यायै । विश्वमात्रैकधारिण्यै । विश्वभरण्यै ।
विश्वात्मने । विश्वालयव्रजेश्वर्यै । विश्वासरूपायै । विश्वेषां
साक्षिण्यै । विस्तृतोत्तमायै । वीणावाण्यै । वीतभ्रान्त्यै ।
वीतरागस्मयादिकायै । वीतशङ्कासमाराध्यायै । वीतसम्पूर्णसाध्वसायै ।
बुधाराध्याङ्घ्रिकमलायै । वृषपायै । वेदकारणायै । वेदगायै ।
वेदनिःश्वासायै नमः । ६८०

ॐ वेदप्रणुतवैभवायै नमः । वेदप्रतिपाद्यतत्त्वायै ।
वेदवेदान्तकोविदायै । वेदरक्षाविधानज्ञायै । वेदसारमयाकृत्यै ।
वेदान्तवेद्यायै । वेदान्तायै । वैदेह्यै । वैभवार्णवायै ।
वङ्कचिकुरायै । वङ्कभ्रुवे । वङ्काकर्षणवीक्षणायै ।
शक्तिव्रजेश्वर्यै । शक्त्यै । शतमूर्त्यै । शतोदितायै ।
शब्दब्रह्मातिगायै । शब्दविग्रहायै । शमदायिन्यै ।
शमिताश्रितसङ्क्लेशायै नमः । ७००

ॐ शमिभक्त्याशुतोषितायै नमः । शम्पादामोल्लसत्कान्त्यै ।
शम्प्रदध्यानसंस्तवायै । शम्मयाशेषकैङ्कर्य्यायै । सर्वदेहिनां
शरण्यै । शरणागतसन्त्रात्र्यै । असुधारिणां शरण्यैकायै ।
शबरीमानदप्रेष्ठायै । शान्तायै । शान्तिप्रदायिन्यै ।
शाश्वतचिन्तनीयाङ्घ्रिकमलायै । शाश्वतस्थिरायै । शाश्वत्यै ।
शासिकोत्कृष्टायै । शिरोधार्यकराम्बुजायै । शिशिरायै ।
शीलसम्पन्नायै । शुचिगम्याङ्घ्रिचिन्तनायै । शुचिप्राप्यपदासक्त्यै ।

शुद्धान्तःकरणालयायै नमः । ७२०

ॐ शुद्धायै नमः । शुद्धिप्रदध्यानायै । शूलत्रयनिवारिण्यै ।
शैलराजसुतादीष्टायै । शोभासागरसस्कृतायै । शौर्यपाथोनिधये ।
श्यामायै । श्रयणीयपदाम्बुजायै । श्रवणीययशोगाथायै । श्रीकर्यै ।
श्रीप्रदायिन्यै । श्रीमदुत्तंसमहितायै । श्रीमय्यै । श्रीमहानिधये ।
श्रीलक्ष्म्यादिभिः सेव्यायै । श्रीवासायै । श्रीसमुद्भवायै । श्रियै ।
श्रुतिगीतचरितायै । श्रुत्यन्तप्रतिपादितायै नमः । ७४०

ॐ श्रेयोगुणेरणायै नमः । श्रेयोनिधये । श्रेयोमयस्मृत्यै ।
श्रोत्रियैकसमाराध्यायै । श्लक्ष्णसूनृतभाषिण्यै ।
श्लाघनीयमहाकीर्त्यै । श्लीलचारित्र्यविश्रुतायै ।
श्लोकलोकार्चिताब्जाङ्घ्र्यै । श्वसनाधीशसत्कृतायै ।
श्वेतधामोल्लसद्वक्त्रायै । षड्ऋतुर्वस्विलोदितायै । षडतीतायै ।
षडाधारायै । षडर्द्धाक्षहृदिस्थितायै । सखीमण्डलमध्यस्थायै ।
सगुणायै । सङ्गयोज्झितायै । सङ्ख्यातीतगुणायै । सङ्गमुक्तायै ।
सङ्गीतकोविदायै नमः । ७६०

ॐ सङ्गीर्णप्रणतत्राणायै नमः । सङ्ग्रहानुग्रहे रतायै ।
सख्यशीघ्रसमासाद्यायै । सज्जनोपासिताङ्घ्रिकायै ।
सतताराध्यचरणायै । सतीत्वादर्शदायिन्यै । सतीवृन्दशिरोरत्नाय ।
सतीशाजस्रभावितायै । सत्तमायै । सत्यधर्मैकपालिकायै ।
सत्यरूपिण्यै । सत्यसञ्चिन्तनायै । सत्यसन्धायै । सत्यापतिस्नुषायै ।
सत्यायै । सत्रधरागर्भोद्भूतायै । सत्त्ववदग्रण्ये । सदाचारायै ।
सदासेव्यायै । सद्दशातीतशेमुष्यै नमः । ७८०

ॐ सनातन्यै नमः । सदानम्यायै । सन्तोषैकप्रदायिन्यै ।
सन्देहापहरायै । सन्धये । सन्निषेव्यसमाश्रितायै ।
सन्नुत्याशेषचरितायै । सभ्यलोकसभाजितायै ।
समग्रज्ञानवैराग्यधर्मश्रीर्यशोनिधये । समग्रैश्वर्यसम्पन्नायै ।
समतीतगुणोपमायै । समदृष्ट्यै । समर्च्यैकायै । समर्थाग्र्यायै ।
समर्धकायै । समविश्वमनोज्ञाङ्ग्यै । समवेक्ष्याङ्घ्रिलाञ्छनायै ।
समाकर्ण्ययशोगाथायै । समाहर्त्र्यै । समाहितायै नमः । ८००

ॐ समानात्मने नमः । समाराध्यायै । समालम्ब्याङ्घ्रिपङ्कजायै ।

समावर्तायै । समासेव्यायै । समार्हायै । समितिञ्जयायै ।
समीक्ष्याव्याजकरुणायै । सविभाव्यसुविग्रहायै । सरयूपुलिनाक्रीडायै ।
सरलायै । सरसेक्षणायै । सर्गस्थित्यन्तप्रभवायै ।
सर्वकामप्रदायिन्यै । सर्वकार्यबुधायै । सर्वच्छद्मज्ञायै ।
सर्वजन्मदायै । सर्वजीवहितायै । सर्वज्ञानिनां ज्ञेयसत्तमायै ।
सर्वज्ञाननिधये नमः । ८२०

ॐ सर्वज्ञानवद्भिरुपासितायै नमः । सर्वज्ञायै । सर्वज्येष्ठाद्यै ।
सर्वतीर्थमयस्मृत्यै । सर्वतोऽक्ष्यास्यहस्ताङ्घ्रिकमलायै ।
सर्वदर्शनायै । सर्वदिव्यगुणोपेतायै । सर्वदुःखहरस्मितायै ।
सर्वदेवनुतायै । सर्वधर्मतत्त्वविदां वरायै । सर्वधर्मनिधये ।
सर्वनायकोत्तमनायिकायै । सर्वनीतिरहस्यज्ञायै ।
सर्वनैपुण्यमण्डितायै । सर्वपापहरध्यानायै । सर्वपावनपावन्यै ।
सर्वभक्तावनाभिज्ञायै । सर्वभक्तिमतां गत्यै ।
सर्वभाव-पदातीतायै । सर्वभाव-प्रपूरिकायै नमः । ८४०

ॐ सर्वभक्तिप्रदोत्कृष्टायै नमः । सर्वभूतहिते
रतायै । सर्वभूताशयाभिज्ञायै । सर्वभृतसुधारिण्यै ।
सर्वमङ्गलमाङ्गल्यायै । सर्वमण्डनमण्डनायै । सर्वमेधाविनां
श्रेष्ठायै । सर्वमोदमयेक्षणायै । सर्वमोहच्छिदासक्त्यै ।
सर्वमोहनमोहिन्यै । सर्वमौलिमणिप्रेष्ठायै । सर्वयज्ञफलप्रदायै ।
सर्वयज्ञव्रतस्नातायै । सर्वयोगविनिःसृतायै ।
सर्वरम्यगुणागारायै । सर्वलक्षणलक्षितायै । सर्वलावण्यजलधये ।
सर्वलीलाप्रसारिण्यै । सर्वलोकनमस्कार्यायै । सर्वलोकेश्वरप्रियायै नमः । ८६०

ॐ सर्वलोकेश्वर्यै नमः । सर्वलौकिकेतरवैभवायै ।
सर्वविद्याव्रतस्नातायै । सर्ववैभवकारणायै ।
सर्वशक्तिमतामिष्टायै । सर्वशक्तिमहेश्वर्यै । सर्वशत्रुहरायै ।
सर्वशरणायै । सर्वशर्मदायै । सर्वश्रेयस्कर्यै । सर्वसहायै ।
सर्वसदर्चितायै । सर्वसद्भावनाधारायै । सर्वसद्भावपोषिण्यै ।
सर्वसौख्यप्रदायै । सर्वसौभाग्यैकप्रदायिन्यै ।
साकेतपरमस्थानायै । साकेतपरमोत्सवायै । साकेताधिपतिप्रेष्ठायै ।
साकेतानन्दवर्षिण्यै नमः । ८८०

ॐ साक्षाच्छ्रियै नमः । सर्वदेहिनां सर्वकर्मणां साक्षिण्यै ।
साघप्राणिजनारुष्टायै । सातपत्रोत्तमासनायै । साधनातीतसम्प्राप्त्यै ।
साध्यायै । साध्वीजनप्रियायै । सामगायै । सामगोद्गीतायै ।
साफल्यैकप्रदायिन्यै । सामर्थ्यजगदाधारमोहिन्यै । साम्यदायिन्यै ।
सारङ्गायै । सिद्धसङ्कल्पायै । सिद्धसेव्यपदाम्बुजायै । सिद्धार्थायै ।
सिद्धिदायै । सिद्धिरूपिण्यै । सिद्धिसाधनायै । सीतायै नमः । ९००

ॐ सीमन्तिनीश्रेष्ठायै नमः । सीरध्वजनृपात्मजायै । सुकटाक्षायै ।
सुकीर्तीड्यायै । सुकृतीनां महाफलायै । सुकेश्यै । सुखमूलैकायै ।
सुखसन्दोहदर्शनायै । सुगमायै । सुघनज्ञानायै । सुचार्व्यै ।
सुजवोत्तमायै । सुज्ञायै । सुतन्व्यै । सुदत्यै । सुदाननिरताश्रयायै ।
सुधावाण्यै । सुधीरात्मने । सुधीश्रेष्ठायै । सुधेक्षणायै नमः । ९२०

ॐ सुनयनाक्रोडरत्नाय नमः । सुनयनाप्रपोषितायै ।
सुनयनामहाराज्ञीहृदयानन्दवर्द्धिन्यै । सुनासायै । सुनिदिध्यास्यायै ।
सुनीत्यै । सुप्रतिष्ठितायै । सुप्रसादायै । सुभगायाः
करपल्लवचर्चितायै । सुभगायै । सुभुजायै । सुभ्रुवे । सुमुख्यै ।
सुरपूजितायै । सुराध्यक्षायै । सुरानम्यायै । सुराधीशजरक्षिकायै ।
सुरेश्वर्यै । सुलभायै । सुवर्णाभाङ्गशोभनायै नमः । ९४०

ॐ सुवेद्यैकायै नमः । सुशरणायै । सुश्रियै । सुश्लोकसत्तामायै ।
सृष्टदीनहितोपायायै । सृष्टिजन्मादिकारिण्यै । सेव्यायै ।
सैरध्वजीज्येष्ठायै । सोमवत्प्रियदर्शनायै । सौभाग्यजनन्यै ।
सौम्यायै । सर्वासुधारिणां स्थानायै । स्थिरायै । स्थूलदयायै ।
स्थूलसूक्ष्मविलक्षणायै । स्रष्टृपात्रन्तकर्तॄणामीश्वर्यै ।
स्वगतिप्रदायै । स्वङ्गिकायै । स्वच्छहृदयायै । स्वच्छन्दायै नमः । ९६०

ॐ स्वजनप्रियायै नमः । स्वजनानन्दनिवहायै । स्वतर्क्यायै ।
स्वधरस्मितायै । स्वधर्माचरणाख्यातायै । स्वधर्मावनपण्डितायै ।
स्वधास्वरूपायै । स्वधृतायै । स्वभावाघहरस्मितायै ।
स्वभावापास्तनाशंस्यायै । स्वभावावर्ण्यमार्दवायै ।
स्वभावावाच्यवात्सल्यायै । स्ववशायै । स्वस्तिदक्षिणायै ।
स्वस्तिदायै । स्वस्तिरूपायै । सर्वदेहिनां स्वामिन्यै । स्वास्यायै ।
स्वाश्रितसर्वेष्टदायिन्यै । स्विष्टदेवतायै नमः । ९८०

ॐ स्वेच्छाचारेणरहितायै नमः । हरिणोत्फुल्ललोचनायै ।
हारसम्भूषितायै । हास्यस्पर्द्धिचन्द्रकरव्रजायै । सर्वजगतां
हितकारिण्यै । हृदयानन्दवर्द्धिन्यै । हृदयेश्यै । हृद्यैकायै ।
हेमागारनिवासिन्यै । हेमासेव्यपदाम्भोजायै । हेयपादाब्जविस्मृत्यै ।
ह्लादिन्यै । ह्रीमतां श्रेष्ठायै । क्षमाध्वस्तधरास्मयायै । क्षमिणां
क्षमास्वरूपायै । क्षमेश्यै । क्षान्तिविग्रहायै । क्षितीशतनयायै ।
क्षेमदायिन्यै । क्षेमयाऽर्चितायै नमः । १०००

श्रीजानकीचरितामृते सप्ताशीतितमोऽध्यायोधृता
श्रीजानकीसहस्रनामावलिः सामाप्ता ॥ ८७॥

Proofread by Raman. M, PSA Easwaran

*Janaki Sahasra Namavali*

pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*